श्रीः

# महोपनिषत् ॥

[ओम् आप्यायन्त्विति शान्तिः ।]

अथातो महोपनिषदं व्याख्यास्यामः । तदाहुः—एको ह वै

---

श्रीः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः ।

महोपनिषत्प्रकाशः ।

नारायणं निखिलचेतननिर्विशेषं नाथं चतुर्मुखमहेशमुखस्य हेतुम् ।
नानाविधागमनुतं निखिलात्मभूतं नारायणाद्रिनिलयं नियतं नमामि ॥

श्रीभाष्ये, 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' इति वाक्यस्य नारायणपारम्यप्रतिपादनार्थमुदाहरणात्, अस्य च वाक्यस्यात्र महोपनिषदि दर्शनात् इयमादरणीयेति स्थितम् ।

आचार्यतल्लजैश्च श्रीमद्वेदान्तदेशिकैः सच्चरित्ररक्षायां सुदर्शनपाञ्चजन्यधारणविधौ इत्थं प्रत्यबोधि—, "एतेन महोपनिषदः कैश्चिदनुदाहततत्त्वचोद्यमपास्तम् । कति कति दृश्यन्ते भाष्यकारादिभिरनुपात्ता उपनिषदः । न केवलं भगवद्रामानुजमुनिभिरेव महोपनिषदुपात्ता ; अपि तु तत्परमाचार्यैर्भगवद्यामुनमुनिभिरपि पुरुषनिर्णये समुपात्ता । न चैवमेकसिद्धान्तनिष्ठैरेव तदुपादानम् ; अपि तु तद्विरुद्धसन्मात्रब्रह्मभेदाभेदनिष्णातैः यादवप्रकाशैरपि भगवद्गीताभाष्येऽष्टमाध्याये । तथा तन्मतानुसारिभिर्नारायणार्यैरपि तत्त्वनिर्णये श्रुतितात्पर्यनिर्णयाधिकारे सोपबृंहणनानाविधश्रुतिशिखरनिकरोदाहरणावसरे महोपनिषदाद्यान्, 'एक एव नारायणः' इत्यादिकान् चतुरो मन्त्रान् उदाहृत्य, 'एषा चोपनिषत्, एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानौ सृष्टिसंहारकारकौ' इत्यादिभिरितिहासैः, 'तत्क्रोधसंभवो रुद्रः प्रसादाच्च पितामहः', 'यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः' इत्यादिभिः पुराणैश्चोपबृंहिता' इत्युक्तम्" इति ।

नारायण आसीत् । न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमाः । स एकाकी न रमेत । तस्य ध्यानान्तःस्थस्य यज्ञस्तोममुच्यते । तस्मिन् पुरुषाश्चतुर्दश जायन्ते ।

---

अनेन ब्रह्मरुद्रकारणतया नारायणप्रतिपादिकाया महोपनिषदः प्रामाण्यमास्थेयमिति सिद्धम् ।

परं तु केयं महोपनिषदिति किञ्चिद् विचारणीयं लक्ष्यते, यदत्र सच्चरित्ररक्षासूक्तौ महोपनिषद्वाक्यतया चत्वारो मन्त्राः, 'एक एव नारायण' इत्याद्या नारायणार्योदाहृततया वेदिताः अस्यां महोपनिषदि न लक्ष्यन्ते । न केवलमेतावत् । अत्रैव ग्रन्थे पूर्वं परमेश्वरसंहितावचनोदाहरणावसरे, 'स्नापयेद् ब्रह्मसूक्तस्थैर्मन्त्रैरष्टभिरेव च' इति, 'दक्षिणे तु भुजे विप्र इति पञ्चमेन वै' इति, 'यद्वा सर्वस्य वशिनमित्याद्यैर्मनुभिः क्रमात् । महोपनिषदन्तःस्थैर्दिक्स्थैः कलशाष्टकैः । एक एव नारायण इति मध्यगतेन तु' इति चोदाहृत्यैव विवृतम्—अत्र ब्रह्मसूक्तमिति महोपनिषन्मध्यगताः सहस्रशीर्ष इत्याद्याः एकोनविंशतिर्मन्त्राः । तत्रोपरितना अष्टौ मन्त्राः, 'सर्वस्य वशिनम्' इत्याद्याः । तत्र, 'दक्षिणे तु भुजे विप्र' इति पञ्चमो मन्त्रः । 'एक एव नारायण' इति महोपनिषदाद्यो मन्त्रः—इति । न चैते मन्त्राः अस्यां महोपनिषदि यथावत् अद्यत्वे लक्ष्यन्ते । तस्मादन्या काचित् महोपनिषदानुपूर्वी अवश्यमेव गवेषणीयाऽस्ति, महोपनिषद्द्वयमित्यत्र मानाभावे । अस्मदीयः सच्चरित्ररक्षानुबन्धोऽपि द्रष्टव्यः ।

अथाप्यस्यामपि महोपनिषदि श्रीभाष्योदाहृतवाक्योपलम्भात् नारायणपारम्यस्य निर्विचिकित्सं प्रतिपादकत्वाच्चैतत्प्रकाशनमपि स्थाने ।

एको ह वै नारायण इति सृष्ट्यारम्भे नारायणमात्रसद्भावश्रवणात्, नारायणपदस्य श्रियःपत्यौ रूढत्वात्, ब्रह्मेशानादेः तदा सद्भावप्रतिषेधाच्च नारायणपारम्यं निर्विचिकित्सम् । यज्ञस्तोम-

एका कन्या। दशेन्द्रियाणि। मन एकादशं तेजः। द्वादशोऽहंकारः। त्रयोदशकः प्राणः। चतुर्दश आत्मा। पञ्चदशी बुद्धिः। भूतानि पञ्च तन्मात्राणि। पञ्च महाभूतानि। स एकः पञ्चविंशतिः पुरुषः। तत्पुरुषं पुरुषो निवेश्य। नास्य प्रधानसंवत्सरा जायन्ते। संवत्सराद्धिजायन्ते।

अथ पुनरेव नारायणः सोऽन्यत्कामो मनसाऽध्यायत। तस्य ध्यानान्तःस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषो जायते बिभ्र-

---

मुच्यते इति। आराधनोपयोगिवस्तु यूह उच्यते उपरितनवाक्यैरित्यर्थः। उपरि देहेन्द्रियादिसंघाततत्कारणादिकथनात्। पुरुषाः चतुर्दश जायन्ते इत्यस्य विवरणम् दशेन्द्रियाणीत्यादिना। एका कन्येत्यस्य विवरणम् पञ्चदशी बुद्धिरिति। आत्मेति शरीरमुच्यते। स एकः पञ्चविंशतिः पुरुषः। मनआदीनां बहूनामेषां स्वामी जीव एको भवति। एकैकस्यापि जीवस्येमानि बहूनि पृथक्पृथगुपकरणानीत्यर्थः। अत्र, 'जगति जीव एक एवास्ति' इति न विवक्षितम्। किन्तु एतेषां बहूनां स्वामी एको जीवो भवतीत्यर्थज्ञापनमात्रं चिकीर्षितम्। पुरुषस्य पञ्चविंशत्वं चतुर्विंशतिविधप्रकृतिप्राकृतपदार्थाधिकत्वात्। तत् पुरुषं पुरुषो निवेश्येति। पुरुषो नारायणः पुरुषं जीवं निवेश्य तत् पूर्वोक्तं मनआदिकमेकसंघातापन्नं करोतीति शेषः।

नास्य प्रधानसंवत्सरा जायन्ते। संवत्सरशब्दः प्रजापतौ चतुर्मुखे तत्रतत्र प्रयुज्यते। तस्य संवत्सररूपायुर्गणनया सृष्टिव्यग्रत्वात्। प्रजापतिरूपः संवत्सरः प्रधानभूतो येषाम्, ते जीवाः अस्य परमात्मनः सकाशात् साक्षान्न जायन्ते तस्मात् प्राक्। किन्तु संवत्सरात् प्रजापतेः अधि ऊर्ध्वं जायन्ते।

नारायणापेक्षया निकृष्टस्यापि महादेवस्य चतुर्मुखापेक्षयाऽप्यतिशयो विद्यते। अत एव हि त्रिषु ब्रह्मणः पारम्यपक्षो निविष्टो नैव लक्ष्यन्ते लोके। विवादस्तु नारायणस्य महादेवस्य वा कतरस्य

चिरूयम् । यश सत्य ब्रह्मचर्यं तपो वैराग्य मन ऐश्वर्यं सप्रणवा व्याहृतय ऋग्यजु सामाथर्वाङ्गिरस सर्वाणि छन्दांसि , तान्यङ्गे समाश्रितानि । तस्मादीशानो महादेवो महादेव ॥

अथ पुनरेव नारायण सोऽन्यत्कामो मनसाऽध्यायत । तस्य ध्यानान्तस्थस्य ललाटात् स्वेदोऽपतत् । ता इमा प्रतता आप । ततस्तेजो हिरण्मयमण्डम् । तत्र ब्रह्मा चतुर्मुखोऽजायत । सोऽध्यायत् पूर्वाभिमुखो भूत्वा भूरिति व्याहृतिर्गायत्र छन्द ऋग्वेदोऽग्निर्देवता । पश्चिमाभिमुखो भूत्वा , भुवरिति व्याहृतिस्त्रैष्टुभ छन्दो यजुर्वेदो वायुर्देवता । उत्तराभिमुखो भूत्वा , स्वरिति व्याहृतिर्जागत छन्द सामवेद सूर्यो देवता । दक्षिणाभिमुखो भूत्वा महरिति व्याहृति-रानुष्टुभ छन्दोऽथर्ववेद सोमो देवता ।

सहस्रशीर्ष देव सहस्राक्ष विश्वशम्भुवम् ।
विश्वत परम नित्य विश्व नारायण हरिम् ॥
विश्वमेवेद पुरुषस्तद्विश्वमुपजीवति ।
पति विश्वेश्वर देव समुद्रे विश्वरूपिणम् ॥
पद्मकोशप्रतीकाश लम्बत्याकोशसन्निभम् ।
हृदय चाप्यधोमुख सतत्यै सीत्कराभिश्च ॥
तस्य मध्ये महानर्चिर्विश्वार्चिर्विश्वतोमुखम् ।

---

पारस्यमित्यैवेत्याशयेन चतुर्मुखात् प्रागेव महादेवं महापुरुषलम्भित जन्मभूमान श्रुतिराह अथेति । एतावताऽस्य ब्रह्मापेक्षया पूर्वोत्पन्नत्वं न मन्तव्यमिति शङ्कापनाय पूर्वं नारयेत्यादिवाक्यम् ।

भूत्वेत्यत्र अध्यायदित्यस्यानुषङ्ग । देवतेत्यन्तवाक्येषु अजायन्तेत्यध्याहार । सहस्रशीर्षमित्यादि प्रथमान्त वाक्यम् । यद्वा द्वितीयान्तमेव , उपजीवतीत्यत्रान्वयसम्भवात् । 'विश्वमेवेद पुरुष ' इति तु प्रधानवाक्यमध्यगतमवान्तरवाक्यम् । सीत्कराभिरिति सिराभि-रित्यर्थ । सतत्यै = सततत्वात् हृदयमधोमुख [illegible]

एका कन्या। दशेन्द्रियाणि। मन एकादशं तेजः। द्वादशोऽहंकारः। त्रयोदशकः प्राणः। चतुर्दश आत्मा। पञ्चदशी बुद्धिः। भूतानि पञ्च तन्मात्राणि। पञ्च महाभूतानि। स एकः पञ्चविंशतिः पुरुषः। तत्पुरुषं पुरुषो निवेश्य। नास्य प्रधानसंवत्सरा जायन्ते। संवत्सरादधिजायन्ते।

अथ पुनरेव नारायणः सोऽन्यत्कामो मनसाऽध्यायत। तस्य ध्यानान्तःस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषो जायते बिभ्र-

---

मुच्यते इति। आराधनोपयोगिवस्तुव्यूह उच्यते उपरितनवाक्यैरित्यर्थः। उपरि देहेन्द्रियादिसंघाततत्कारणादिकथनात्। पुरुषाः चतुर्दश जायन्ते इत्यस्य विवरणम् दशेन्द्रियाणीत्यादिना। एका कन्येत्यस्य विवरणम् पञ्चदशी बुद्धिरिति। आत्मेति शरीरमुच्यते। स एकः पञ्चविंशतिः पुरुषः। मनआदीनां बहूनामेषां स्वामी जीव एको भवति। एकैकस्यापि जीवस्येमानि बहूनि पृथक्पृथगुपकरणानीत्यर्थः। अत्र, 'जगति जीव एक एवास्ति' इति न विवक्षितम्। किन्तु एतेषां बहूनां स्वामी एको जीवो भवतीत्यर्थज्ञापनमात्रं चिकीर्षितम्। पुरुषस्य पञ्चविंशत्वं चतुर्विंशतिविधप्रकृतिप्राकृतपदार्थाधिकत्वात्। तत् पुरुषं पुरुषो निवेश्येति। पुरुषो नारायणः पुरुषं जीवं निवेश्य सत् पूर्वोक्तं मनआदिकमेकसंघातापन्नं करोतीति शेषः।

नास्य प्रधानसंवत्सरा जायन्ते। संवत्सरशब्दः प्रजापतौ चतुर्मुखे तत्रतत्र प्रयुज्यते। तस्य संवत्सररूपायुर्गणनया सृष्टिव्यग्रत्वात्। प्रजापतिरूपः संवत्सरः प्रधानभूतो येषाम्, ते जीवाः अस्य परमात्मनः सकाशात् साक्षान्न जायन्ते तस्मात् प्राक्। किन्तु संवत्सरात् प्रजापतेः अधि ऊर्ध्वं जायन्ते।

नारायणापेक्षया निकृष्टस्यापि महादेवस्य चतुर्मुखापेक्षयाऽप्यतिशयो विद्यते। अत एव हि त्रिषु ब्रह्मणः पारम्यपक्षे निविष्टा नैव लक्ष्यन्ते लोके। विवादस्तु नारायणस्य महादेवस्य वा कतरस्य

तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थित: ॥
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स ईशानः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

इति महोपनिषत् ॥*

शुभमस्तु

---

स्वन्वयः । अस्य सहस्रशीर्षमित्यादेरर्थो नारायणानुवाके तैत्तिरीयगते विशदं द्रष्टव्यः । अष्टोत्तरोपनिषत्कोशे अशुद्धिबाहुल्यं सम्यगवधारितम् । अतस्तत्रतत्र यथावस्थितः पाठोऽप्यन्विष्य ग्राह्यः ।

इति श्रीवात्स्यचक्रवर्ति-वीरराघवाचार्यकृतिषु
उपनिषद्भाष्यपरिष्कारे महोपनिषत्परिष्कारः ।

शुभमस्तु ॥

---

*एतावत्पर्यन्ता महोपनिषत् बहुपरिग्रहेण प्रामाण्यं निर्विवादं लभते । एतदुपरितनास्तु पञ्चाध्यायाः विस्तृता अनुष्टुप्छ्लोकात्मकाः शुकजनकनिदाघादिनानापुरुषवृत्तान्तनिबन्धरूपाः पुराणशैलीमनुरुन्धानाः अविस्रम्भादनावश्यकत्वाच्च न प्रकाश्यन्ते । अत्रायमपि कश्चिदूहः पदं लभते । तदाहुरित्यारभ्यैव महोपनिषत् भाव्या । तद्व्याख्यानार्थं प्रवृत्तेन अथातो महोपनिषदं व्याख्यास्यामः इत्युपक्रम्य महोपनिषद् समस्तां तदाहुरित्यादिना यथामति पठित्वा सैषा तत्सारार्थस्य जिज्ञापयिषया शुकादिवृत्तान्तमयैः पञ्चभिरध्यायैः सामान्यतो व्याख्यायीति । अवश्यमन्या काचिदानुपूर्वी महोपनिषदोऽस्तीति परिष्कारेऽदर्शयाम । उपलम्भे साऽप्यानुपूर्वी प्रकाशयिष्यते ।

—: :—